## अध्याय :- ४९ chapter-49

अर्जुन उवाच ।।
अत्यद्भुतानि तीर्थानि लिंगानि च महामुने ।।
श्रुत्वा तव मुखांभोजाद्भृशं मे त्वृष्यते मनः ।। *१ १

श्री मन्महीनगरके यानि तीर्थानि फाल्गुन ।।
तानि वक्ष्यामि यत्रास्ते जयादित्यो रविः प्रभुः ।। २

जयादित्यस्य यो नाम कीर्तयेदिह मानवः ।। ३

सर्वरोग निर्मुक्तो लभेत्सो पि त्वदीप्सितम् ।। ४

यस्य संदर्शनादेव कल्याणैरपि पूर्यते ।।
मुच्यते चाप्य कल्याणैः श्रद्धावान्पार्थ मानवः ।। ५

तस्य देवस्य चोत्पत्तिं श्रृणु पार्थ वदामि ते ।।
श्रृण्वन्वा कीर्तयन्वापि प्रसादं भास्करात्लभेत् ।। ६

अहं संस्थाप्य संस्थानमेतत्कालेन केनचित् ।।
प्रयातो भास्करं लोकं दर्शनार्थी यदृच्छया ।। ७

---

* १ After the first sloka श्री नारद उवाच ।।
is missing in the P.W., whereas it is mentioned in both M.S.S. 'A' & 'B'

स मां प्रणतमासीनमभ्यच्याच्यार्घेण भास्करः ।।
प्रहसन्निव प्राहेदं देवो मधुरया गिरा ।। ८

कुत[1] आगम्यते विप्र क्व च वा प्रतिगम्यते ।।
क्व चायं नारदमुने कालस्ते वित्दतोऽभवत् ।। ९

नारद उवाच ।।[2]
एवमुक्तो भास्करेण तं तदा प्राब्रवं वचः ।।
भारते वित्दतः खण्डे महीनगरकादपि[3] ।।
दर्शनार्थं तव विभो समायातोऽस्मि भास्कर ।। १०

रवि उवाच ।।
यत्त्वया स्थापितं स्थानं तत्र ये संति ब्राह्मणाः ।।
तेषां गुणान्ममब्रूहि किंगुणाननु ते द्विजाः ।। ११

नारद उवाच[4] ।।
एवं पृष्टो भगवता पुनरेवाब्रवं वचः ।। १२

यदि तान्भोः प्रशंसामि स्वीयान्स्तौतीति वाच्यता ।।
निंदाम्यनर्हान्किस्मादवा कष्टमेवो भयत्र च ।। १३

अथवाऽपार माहात्म्ये सति तेषां महात्मनाम् ।।
ह्य अल्पकृते वर्णनि स्यादोष एव महान्मम ।। १४

---

१ अ. ब. कुत   २ अ. श्री नारद ।। ब. श्री नारद उ० ।।
३ अ. महीसागरकादपि   ४ अ. ब. 'श्री नारद' इति स्यात् ।

मदर्चितद्विजेंद्राणां यदि स्याच्छ्रवणेप्सुता ।।
ततः स्वयं विलोकयास्ते गत्वेदं मे मतं रवे ।। १५

इति श्रुत्वा मम वचो रविरासीत्सुविस्मितः ।।
स्वयं द्रक्ष्यामि चोवाच पुनः पुनरहर्षितिः ।। १६

सोऽथ विप्रतनुं कृत्वा मां विसर्ज्यैव भास्करः ।।
प्रतपन्दिवि योगाच्च प्रयातोर्णविरोधसि ।। १७

जयं त्रिषवणस्नान पिंगलां धारयन्नथ ।।
वृद्ध द्विजो महातेजा ददर्श ब्राह्मणैर्मम ।। १८

ततो हारीतप्रमुखाः प्रहर्षोत्फुल्ल लोचनाः ।।
उत्थाय ब्रह्मशालायास्ते द्विजा द्विजमाद्रवन्[१] ।। १९

नमस्कृत्य द्विजाग्र्यं ते प्रहर्षादिदम ब्रुवन ।। २०

अद्यनो दिवसः[२] पुण्यः स्थानमद्योत्तमं त्विदम् ।।
यत्त्वया विप्रप्रवर स्वयमागमनं कृतम् ।। २१

---

१ ब. वर्न

२ अ. दिवस

धन्यस्य हि गृहस्थस्य कृपयैव द्विजोत्तमाः ।।
आतिथ्यवेषेणायांति पावनार्थं न संशयः ।। २२

तत्त्वं गेहानि चास्माकं पादचंक्रमणेन च ।।
दर्शनाद्भोजनात्स्थादस्माभिः सह पावय ।। २३

अतिथिरुवाच ।।
[1]भोजनं द्विविधं विप्रा प्राकृतं परमं तथा ।।
तद हं सम्यगिच्छामि दत्तं परम भोजनम् ।। २४

इत्येतदतिथेः श्रुत्वा हारीतः पुत्रम ब्रवीत् ।।
अष्टवर्षंतु कमठं येत्सि पुत्र द्विजोदितम् ।। २५

कमठ [2]उवाच ।।
तात प्रणम्य त्वां वक्ष्ये तादकपरम भोजनम् ।।
द्विजं च तर्पयिष्यामि दत्त्वा परम भोजनम् ।। २६

सुतेन किल जातेन जायते चानृणः पिता ।।
सत्यं करिष्ये तद्वाक्यं संतर्प्यातिथिमुत्तमम् ।। २७

भोजनं द्विप्रकारं च प्रविभागस्तयोरयम् ।।
प्राकृतं प्रोच्यते त्वेवमन्यत्परम भोजनम् ।। २८

---

१ भोजनं द्विविधं अ॰ प्रतौ लुप्तम्
२ अ॰ प्रतौ उवाच नास्ति ।

तत्र यत्पाकृतं[1] नाम प्रकृति प्रमुखस्य तत् ।।
चतुर्विंशति तत्त्वानां गणस्योक्तं हि तर्पणम् ।। २९

षड्रसं भोजनं तच्च पंचभेदं वदंति च ।।
येन भुक्तेन[2] तृप्तं स्यात्क्षेत्रं यदेह लक्षणम् ।। ३०

यथा[3] परं परं नाम प्रोक्तं परम भोजनम् ।।
परमः प्रोच्यते चात्मा तस्य तदोभोजनं भवेत् ।। ३१

ततो नाना प्रकारस्य धर्मस्य श्रवणं हि यत्[4] ।।
तदन्नं[5] प्रोच्यते भोक्ता क्षेत्रज्ञः श्रवणो मुखम् ।। ३२

तदास्यामि द्विजाग्र्याय पृच्छ विप्र यदिच्छसि[6] ।।
शक्ति तस्तर्पयिष्यामि त्वामहं विप्र संसदि ।। ३३

नारद उवाच ।।[7]
कमठस्यै तदाकर्ण्य ~~सर्वं निर्विर्भुत~~ सोऽतिथिर्वचनं महत् ।।
मनसैव प्रशस्यामुं प्रश्नमेनमथा करोत् ।। ३४

कथं संजायते जंतुः कथं चापि प्रलीयते ।।
भस्मतामथ संप्राप्य क्व चार्य प्रति पद्यते ।। ३५

---

१ ब. तत्प्राकृतं
२ ब. भुक्तेन
३ ब. तथा
४ अ. तत
५ अ. यदन्नं
६ अ. यदीछसी
७ अ. ब. 'श्री नारद'

कमठ [1]उवाच ।।

गुरवे प्राङ्नमस्कृत्य धर्माय तदनंतरम् ।।
छंदो गीतममुं प्रश्नं शक्त्या वक्ष्यामि ते द्विज ।। ३६

जनने त्रिविधं कर्म हेतुर्जतोभवित्किल ।।
पुण्यं पापं च मिश्रं च सत्त्वराजसतामसम ।। ३७

तत्र यः सात्त्विको नाम स स्वर्गं प्रतिपद्यते ।।
स्वर्गात्काल परिभ्रष्टो धनी धर्मी सुखी भवेत् ।। ३८

तथा यस्ताम ~~[illegible]~~ सोनाम नरकं प्रतिपद्यते ।।
भुक्तवा बहुवियर्तिना स्थावरत्वं प्रपद्यते ।। ३९

महतां दर्शनस्पर्शरूप भोग महासनैः[2] ।।
महतां कालयोगेन संसरन्मानवो[3] भवेत् ।। ४०

सोऽपि दुःख दरिद्राद्यैर्वेष्टितो विकलेंद्रियः ।।
प्रत्यक्षः सर्व लोकानां पापस्यैतद्धिलक्षणम् ।। ४१

अथ यो मिश्र कर्मा[4] ~~[illegible]~~ #+
स्यात्तिर्यकत्वं प्रतिपद्यते ।।
महतद्वमेव संसर्गात्संसरन्मानवो भवेत् ।। ४२

---

१ अ. प्रती 'उवाच' नास्ति ।
२ अ. महासनैः +
३ ब. संसारे मानवो
४ अ. कर्माणि

यस्य पुण्यं पृथुतरं पापमल्पं हि जायते ।।
स पूर्वं दुःखितो भूत्वा पश्चात्सौख्यान्वितो भवेत् ।। ४३

पापं पृथुतरं यस्य पुण्यमल्पतरं भवेत् ।।
पूर्वं सुखी ततो दुःखी मिश्रस्यैतद्वि लक्षणम् ।। ४४

तत्र मानुष संभूतिं श्रृणु यादृगसौ भवेत् ।।
पुरुषस्य स्त्रियाश्चैव शुक्र[१]शोणित संगमे ।। ४५

सर्वदोष विनिर्मुक्तो जीवः संसरते स्फुटम् ।।
गुणान्वित मनोबुद्धि शुभाशुभ समन्वितः ।। ४६

जीवः[२] प्रविष्टो गर्भं तु कलले प्रतितिष्ठति ।।
मूढश्च कलले तत्र मासमात्रं च तिष्ठति ।। ४७

द्वितीयं तु तथा मासं घनीभूतः स विष्ठति[३] ।।
तस्यावयवनिर्माणं तृतीये मासि जायते ।। ४८

अस्थीनि[४] च तथा मासि जायंते च चतुर्थके ।।
त्वग्जन्म पंचमे मासि षष्ठे रोमृणां समुद्गुभवः ।। ४९

---

१ अ. श्रुक्र
२ अ. जीवा
३ ब. तिष्ठति
४ ब. अस्थिनि

सप्तमे च तथा मासि प्रबोधश्चास्य जायते ।।
मातुराहारपीतं च सप्तमे मास्युपाश्नुते ।। ५०

अष्टमे नवमे मासि भृशमुद्विजते ततः ।।
जरायुणावेष्टितांगो मुखे बद्धकरांगुलिः ।। ५१

मध्ये क्लीबस्तु वामे स्त्री दक्षिणे पुरुषस्तथा ।।
तिष्ठत्युदर भागे च पृष्ठेरग्निमुखः किला ।। ५२

यस्यां तिष्ठत्यसौ योनौ तां च वेत्ति न संशयः ।।
सर्वं स्मरति वृतांतं बहूनां जन्मनामपि ।। ५३

अंधे तमसि किंद्रश्यो गंधान्मोहं द्रढं लभेत् ।।
शीते मात्रा जले पीते[1] शीतमुष्णं[2] तयोष्णके ।। ५४

व्यायामे लभते मातुः क्लेशं व्याधिश्च वेदनाम् ।।
अलक्ष्याः[3] पितृमातृभ्यां जायंते व्याधयः पराः[4] ।। ५५

सौ कुमार्याद्रुजं तीव्रां जनयंति च तस्य ते ।।
स्वल्पमप्यथ तं कालं वेत्ति वर्षशतोपमम् ।। ५६

---

१ ब. पाते
२ शतीमुष्णं अ. पाठः ।
३ ब. अलक्षा
४ ब. पुराः

संतप्यते भृशं गर्भे कर्मभिश्चव पुरातनैः ।।
मनोरथांश्चव कुरुते सुकृतार्थं पुनः पुनः ।। ५७

जन्म चेदहमाप्स्यामि मानुष्ये जीवितं तथा ।।
ततस्तत्प्रकरिष्यामि येन मोक्षो भवेत्स्फुटम् ।। ५८

एवं तु चिंतयानस्य सीमंतोन्नयनादनु ।।
मासद्वयं तद्व्रजति पीडतस्त्रियुगाकृति ।। ५९

ततः स्वकाले संपूर्ण सूति मारुत चालितः ।।
भवत्यवाङ्मुखो जंतुः[१] पीडामनुभावन्पराम् ।। ६०

अधोमुखः संकटेन योनिद्वारेण निःसरेत् ।।
पीडया पीडयमानोऽपि चर्मोत्कर्तन तुल्यया ।। ६१

करपत्र[२] समस्पर्श करसंस्पर्शनादिकम् ।।
असौ जातो विजानाति मासमात्रं विमोहितः ।। ६२

प्राक्कर्मवशगस्यास्य गर्भज्ञानं [३]च नश्यति ।।
ततः करोति कर्माणि श्रुवेतक्ता सितानि च ।। ६३

---

१ ब. जंतु
२ अ. करपात्र
३ ब. 'न पश्यति' इति स्यात् ।

अस्थि पट्टतुलास्तंभस्नायु बंधेन यंत्रितम् ।।
रक्तमांस मृदालिप्तं विण्मूत्रद्रव्य भाजनम् ।। ६४

सप्तभित्ति सुसंबद्धं छन्नं रोम तृणैरपि ।।
वदनैकमहाद्वारं गवाक्षाष्ट विभूषितम् ।। ६५

ओष्ठद्वय कपाटं च दंतार्गल विमुद्रितम् ।।
नाडीस्वेद प्रवाहं च कफ पित्त परिप्लुतम् ।। ६६

जरा शोक समाविष्टं कालवक्त्रानलस्थितम् ।।
रागद्वेषादिभिर्ध्वस्तं षट्कौशिक[1] समुद्भवम् ।। ६७

एवं संजायते पुंसो देहगेहमिदं द्विज[2] ।।
यस्मिन्वसति क्षेत्रज्ञो गृहस्थो बुद्धि गेहिनी ।। ६८

मोक्षं स्वर्गं च नरकमास्ते संसाधयन्नपि ।। ६९

*-३ इति श्री स्कंदे.....कमठ सूर्य संवादे जीवस्य देहोत्पत्ति वर्णनं -
- नामैकोनपंचाशत्तमोऽध्यायः ।।४९ ।।

---

१ ब. शाट् कौशक
२ अ. द्विजं
*३ अ. इति श्री कुमारिका खंड ।।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे नवचत्वारिंशोऽध्यायः ।।४९।।